कलापलघुवृत्ति: कातंत्रलघुवृत्तिर्वा

बालबोधिन्याख्या

१८

१६७

१८ पत्राणि

कातंत्र लघुवृत्ति व्याकरण

[illegible]

रविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति अनित्याशुचिनात्मसु विपरीतज्ञानमविद्या॥ इत्यादिकं गुणानां ग्रंथिना दुर्भेद्यस्त्वासौ भवस्य संसारस्य बंधः बंध
ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ
तं विभेदितुं शी

२ ॐ ७ ॐस्वस्त्यस्तुप्रजाभ्यः॥ ॥॥ॐनमःसरस्वतीरूपायगुरवेसद्गुरवे॥॥ ॥ॐनमःश्रीरामाय॥ॐनमोविघ्नहर्त्रे॥ ॥॥ॐनमःशिवाय

वा बो ॐनमःशिवायनिःशेषक्लेशप्रशमशालिने॥त्रिगुणग्रंथिदुर्भेदभवबंधविभेदिने॥॥ ॥ ॥ ॥ॐदिशिदिशिप्रसृतद्रव


८ १ ८ स्ववंत्यःप्रथयंत्यःकांतिनांदृशःप्रमादं॥विश

धिराजः॥स्वस्तुतस्यशिशोर्यशोधरस्यस्मर

दिप्रसंगादपरत्रापिततोभवेदबंध्यः॥इहधु

वाचःमतिजाड्यलवंलवंगजातीफलमूर्वा

वर्णसमाम्नायः॥ अस्तिसिद्धक्रमोवर्णाना



दाःप्रमरंतियस्यगावःसमहात्माजयतिद्विजा

णार्थंविहितोमयाश्रमोयं॥उपयोगमियाद्य

र्यत्रगानवद्यहृद्यक्रमहृद्याःकृतिनांहृदयंग

सविलासमामासजंत्यः॥ ॥*॥ राम ॥ ॐसिद्धो ८ ॐ ८

मकारादीनांसमाम्नायःपाठःमातृकाद्यः कृष्ण राम

अपि तु चपाणिनिनास्वतंत्रेप्रत्याहारार्थमपरथासाधितक्रमः॥तत्रानियमेप्राप्तेनियमःक्रियतेइहतंत्रेसिद्धक्रमएव॥ ८ १ ८

वर्णपाठोवक्ष्यमाणस्वरादिसंज्ञानामाश्रयत्वेनग्राह्योनसाधितक्रमइतिमेयमनियमेनियमःपरिभाषा॥अक्षरगण

वर्णसंज्ञाप्यतरववर्णशब्दोच्चारणाद्बोद्धव्या अआइईउऊऋॠऌॡएऐओऔस्वराः कखगघङ चछजझञ टठडढण
तथदधन पफबभम यरलव शषसह अंअः ᳵकः ᳶपः व्यंजनानि तत्र चतुर्दशादौ स्वराः तत्र प्रसिद्धवर्णसमाम्नाये आदौ ये
चतुर्दशवर्णास्ते स्वरसंज्ञा भवंति अआइईउऊऋॠऌॡएऐओऔ प्रयोजनं रोरे लोपः स्वरश्च पूर्वो दीर्घ इत्यादि वीरीति
दाक्लृप्त्वाशयतोऽसितइति वक्तव्ये दाक्लृप्त्वाशयतोऽसितइति बालेन शक्तिवैकल्याद्यदपभाषितं तदन्यो यदानुकरोति वा
लोदाक्लृप्त्वाशयतोऽसितइत्याहेति तदानुकरणे नास्ति दोषः इति स्मरणात्साधु भवति तत्स्थस्य ऌकारस्य स्वरसंज्ञार्थः ऌ
कारस्यगणः तेनात्र स्वरात्परस्य जकारस्य द्विर्भावः एवं मा क्लृप्तिरित्यत्र वीक्षितिरित्यादौ स्वरत्वे सति ऌकारस्य नामित्वा
न्नामिपरो रमिति ऌकारात्परस्य विसर्जनीयस्य रेफः तत्र शब्द उत्तरत्र संज्ञासमावेशार्थः स्वरसमानसंज्ञे क्रमेण मा
भूतामिति सवर्णादिसंज्ञानां उसंज्ञिनो निर्देशं तएव दशसमानाः तत्रादावित्येव आकांक्षितं सन्निहितयोगप
वैवानुवर्तते तत्रमात्रस्वे वर्णपारे आदौ ये दशवर्णास्ते समानसंज्ञा भवंति अआइईउऊऋॠऌॡ प्रयोजनं स

उँ
बा॰बो॰
२

मानः सवर्ण इत्यादि शिवाभिः तेषां द्वौ द्वावन्योन्यस्य सवर्णौ तेषां समानानां मध्याद्यौ द्वौ द्वौ वर्णौ तावन्योन्यस्य परस्परं सव
र्णसंज्ञौ भवतः अकारस्य आकारः सवर्णः आकारस्य अकारः सवर्णः एवमिकारस्य ईकार इत्यादि पूर्वमेव प्रयोजनं स
मानौ वर्णौ सवर्णावित्यन्वर्थसंज्ञाविज्ञानाद्द्वयोर्ह्रस्वयोर्द्वयोश्च दीर्घयोरन्योन्यं सावर्ण्यं तेन समानत्वदास्थेत्यादौ दी
र्घपरत्लोपो भवतः न त्वेक एवासौ वर्णो द्विरुच्चार्यते नैतौ द्वौ सवर्णौ सति हि भेदे द्वित्वं समानवर्णत्वं च भवति यदाह
यत्र किंचित्सामान्यं कश्चिच्च विशेषः स विषयः सदृश्यतायाः इति तत्कथमत्र द्वयोः सवर्णत्वमुच्यते यत्र एकार आकार
उदात्तः स्वरितो वा अपरस्त्वनुदात्त इत्यत्र स्वरभेदात् सति द्वैधे तावदेष न दोषः एवमिकारादिषु ज्ञेयं तथा चोक्तं ह्रस्वदी
र्घप्लुतत्वाच्च त्रैस्वर्योपनयेन च आनुनासिकभेदाच्चाप्यकारोऽष्टादशात्मकः इति यत्र त्वभेदस्तत्रापि काचिद्भेदारो
पेण द्वित्वं सदृशत्वं च दृश्यते यथा युद्धेर्जुनेर्जुनं इति प्रथितप्रभावो भीमोऽपि भीम इव वैरिषु भीमकर्मा न्यग्रोध
वर्तिनमथाधिपतिं जरणां सोत्याशनार्थमधिजग्मतुरादरेण इत्यादौ तद्वदिहापि भविष्यति अथ वोच्चारकाला

उँ
राम
२

2

६

दिशतः स्पृष्टो विशेषो वक्ष्यं भावीतमाश्रित्यद्वयोः सवर्णत्वं भवति अत एव व्यंजनानां समानस्थानानां श्वासनादघोषादिभेदे
सावर्ण्यं तेन वक्रामतीत्यादावसवर्णे धुटि चवर्गस्याकिरुच्यमानः एच्छति उज्झतीत्यादौ सवर्णो नास्ति एवमंतस्थानामप्यानु
नासिक्याभिन्नानां सवर्णत्वं तेनानुस्वारस्यांतस्थायामंतरतमः सानुनासिक एव परसवर्णो विधीयते संय्यंता संवत्सरः
तंल्लुकं अङ्उपदाच्चा कापि हृतेरितिल्यपि प्रतिषेध अकारऌकारयोरन्योन्यं सावर्ण्यं ज्ञापयति सति हि तस्मिन् परस्त्र
कालस्य सवर्णस्य इति मात्रिकेण अकारेण मात्रिके ऌकारे गृहीते अहृपधात्क्वपि विधीयमानल्ड्डुपधादपि स्यादि
तिल्क्वपि प्रतिषेधोऽर्थवान्भवति चिक्लृपत् इति तस्य सामर्थ्यं उकारः सुरति स्रुतिस्त्रुयति ध्रुस्त्रु इदनुबंधेभ्य इतीड्विकृ
ल्पार्थः क्लृप् कल्पने इमिच्छति धातोर्वा कर्मणः इति सन् नकारः सन्यवर्णस्येत्यर्थः क्लृपेरेल इति अकारे श्रुतेल
श्रुतिः क्लृप्तः इति सनंतस्य चरणपरोक्षेति द्विर्वचनं अभ्यासस्यादिर्व्यंजनमिति पलोपः स्वरः सवर्णस्य याह्का इति अकारे
ण गृहीतस्य ऌकारस्य अकार अवर्णस्येत्येतस्य सन्यवर्णस्येतीत्वं कवर्गस्य चवर्ग इति कस्य चः चिक्लृप्सति इति धात

ॐ वइतिधातुसंज्ञायांसत्यांवर्तमानाति अचि अ संध्यक्षर इति लोपः पूर्वोह्रस्वः द्वौद्वावित्यर्थवशात्सप्तम्यंतं संबध्यते द्वयोर्द्व

बाबो· योःसवर्णयोर्योयः पूर्वः सह्रस्वसंज्ञो भवति अइउऋऌ प्रयोजनं ह्रस्वोबार्थानामित्यादि हेअंब संज्ञार्थवशात्क्वचि

त्रु त्वगुसंज्ञयापिव्यवहारः नामिनश्चोपधायालघोरिति वेदितव्यं · परोदीर्घःस्वरः ह्रस्वइत्यर्थवशात्पंचम्यंतमनुवर्तते

3 ह्रस्वादन्यःस्वरोदीर्घसंज्ञो भवति आईऊॠॡ प्रयोजनं एऐओऔ प्रयोजनंदीर्घमामिसनावित्यादि वस्त्राणि अ

मीनां वायूनां हृणां संध्यक्षराणां दीर्घत्वे प्रयोजनं रोरेलोपंस्वरश्चपूर्वोदीर्घः स्वेरशिमः स्वैरस्नागोरजुः घौ

रम्या अत्रनामिपरोरमितिरेफः तस्यलोपेकृतेपर्जन्यवल्लक्षणप्रवृत्त्या एकारादीनामेकारादय एवदीर्घाभवं ॐ

ति अमतिर्हिसंध्यक्षराणां दीर्घत्वे आतिरि आतिरु इत्यादेोह्रस्ववत्स्थानसावर्ण्यादेकारैकारयोरीकारः ओकारौका राम

रयोः ऊकारश्चदीर्घौस्यातां तालव्योष्ठ्यवत्कंठ्योपिसंध्यक्षराणांस्थानमिति तस्माजात्यादाकारोपिस्यादितिनवाच्यं त्रु

भूयसाव्यपदेशाभवंतीति तालव्योष्ठ्यभागयोर्ह्रस्वत्वात्तालव्योष्ठ्यावीहृतावेवस्यातां अध्यर्धमात्रातालव्या एदै

तोः ऊष्माणोरौतो: अर्धमात्रैवकंठेतिशिक्षाविदः तथारायमिच्छत्यात्मनो रैयति नाम्नआत्मेच्छायामितियिन् इकारस्यकारो
इन्यवर्णस्येत्यर्थौ रायइवाचरति रैयते कर्तरयिसिलोपश्चव्यायि: इकारश्चाय्यंताश्चेत्यर्थः नामिव्यंजनांतादित्या
यिरादिलोपः तेधातवइति धातुसंज्ञायांसत्यां वर्तमानापरस्मैपदप्रथमैकवचनंति आय्यंताश्चेत्यायंत्यादात्मने
पदप्रथमैकवचनंते अत्रापिनाम्यंतानांयरणायीति ईकारोदीर्घःस्यात् तथातेश्चाम्नाः तेछात्राः श्रियैश्चुन्नाः श्रि
यैछत्रः नोश्छद्म नोछद्म तौश्छात्रौ तौछात्रौ शषसेदीर्घात्पदांतात्वाडइतिछस्याद्विर्भावः इहाप्यर्थग्रहणाद्गुरुसं
ज्ञयापिकाचिद्व्यवहारः गुरोश्चानिष्टायांसेटइतिईहानाम्यंतयोर्गुरुमतोन्टश्छइति अव्यप्रतिषेधः संयोगपरेलघोरपि
गुरुसज्ञाज्ञापयति तेनरक्षाहिसेत्यादावेप्रत्ययः अवर्णवर्जोनामी स्वरइत्यवर्णशब्दस्यजात्यर्थत्वाद्वर्णमकारजा
तिमकाराकारौवर्जयित्वाशिष्टःस्वरोनामिसंज्ञोभवति इईउऊऋॠऌॡएऐओऔ प्रयोजनंनामिनःस्वरे द
धिनी एकारादीनिसंध्यक्षराणि एकारआदिर्येषांतानिस्वराइत्यत्वाचत्वार्यववर्णानिसंध्यक्षरसंज्ञानिभवंति

ॐ एऐओऔ प्रयोजनं संध्यक्षरांतानामाकारो विकरण इत्यादि दाता देङ्पाने दैप्शोधने दोअवखंडने औकारस्याप्युत्तरे चतु
बाबो· र्दिसंज्ञा औपगवः शुक्लावाससमानयेनात्र यथोपलक्षणस्यापि वाससआनयनं तद्वदेकारस्यापि संज्ञा भवति एवं गर्गादिरा
४ जादिप्रभृतिष्वादिशब्दपरिगृहीतानां गर्गराजशब्दानां च कार्यत्वं च ज्ञेयं कादीनि व्यंजनानि ककार आदिर्येषां तानि
वर्णानि व्यंजनसंज्ञानि भवंति कखगघङ चछजझञ टठडढण तथदधन पफबभम यरलव शषसह अंअःकः
पः प्रयोजनं व्यंजनमस्वरं परवर्णं नयेदित्यादि त्वमत्र त्वंहरः यज्ञीशः कःकर्ता कःपाति मूर्त्तिःश्रीशा गतिःक
ष्टा भीतिःपूर्णा हरिंस्मरेत्यादावसवर्णे इकारस्य यत्वं प्राप्तं विसर्जनीयादीनां व्यंजनत्वान्नास्ति व्यंजने संधिनिषेधस्याव ॐ
स्यमानत्वात् अनुस्वारस्य च व्यंजनत्वाद्भिन्नजातीयैः स्वरैरव्यवहितानि व्यंजनानि संयोग इत्यनुस्वारसमुदायेऽपरे हिं राम
सेत्यत्रेकारस्य गुरुत्वाद्गुरोश्च निष्ठायामित्य प्रत्ययः इहाप्युपलक्षणस्यापि ककारस्य प्राग्वत्संज्ञा ते वर्गाः पंचपं ४
चशः यन्मुखं सचंद्र इति विद्रूपकाश्रयणेन कादीनीत्यस्य ते वर्गा इत्यनेनाभिन्नलिंगेनाप्यन्वयः यानि कादीनी

तेपंचवर्गाः पंचशःपंचभिःपंचभिरक्षरैर्वेदितव्याः प्राथम्यात्प्राधान्याच्चककचटतपैर्वर्गाणांव्यपदेशः कखगघङ कवर्गःचछ
जझञ चवर्गःटठडढण टवर्गः तथदधन तवर्गः पफबभम पवर्गः प्रयोजनंवर्गोवर्गान्तः यंता वर्गाणांप्रथमद्वितीयाः
शषसाश्चाघोषाः वर्गाणांयेप्रथमास्तथाद्वितीया शषसाश्चते अघोषसंज्ञाभवंति कख चछ टठ तथ पफ शषस प्रयोज्
नमघोषेप्रथमः इषत्कल्पाइच्छामसि घोषवंतोन्ये अघोषाइतिपंचमपंतंसंबध्यते अघोषेभ्योयेन्येव्यंजनसंज्ञकावर्णा
स्तेघोषवत्संज्ञाभवंति गघङ जझञ डढण दधन बभम यरलवह प्रयोजनमकारोदीर्घोघोषवतीत्यादि देवाभ्यां
विसर्जनीयस्यसत्यपिव्यंजनत्वेवर्णसमाम्नायइतिज्ञापकाद्घोषवत्संज्ञानास्ति यदिस्यादकारोदीर्घमितिदीर्घःस्यात् जिह्वा
मूलीयोपध्मानीययोरपिबहिरंगत्वेनासिद्धं बहिरंगमंतरंगेइत्यसिद्धत्वात् अनुस्वारस्यचप्रयोजनाभावात् नह्यनुस्वा
रादिविभक्तिरस्ति यस्यांदीर्घःस्यात् अनुनासिकाङञणनमाः ङञणनमवर्णा अनुनासिकसंज्ञाभवंति प्रयोजन
मतोंतोनुस्वारेनुनासिकांतस्येत्यादि बंबण्यते तंतण्यते चंक्रम्यते यंयम्यते ङञयोरनुनासिकत्वेन धुड्भावात्प्रा
प्ताम् इत्यत्र धुटांतृतीयोनास्ति याञ्चा यज्ञदूत्यादौ चजोःकगौ धुड्घानुबंधयोरितिचजोःकगौनभवतः अनुगतोनासिका

ढु मनुनासिका इतिसंज्ञार्थं पर्यालोचनया नुनासिकस्यानुस्वारस्याप्यनुनासिकत्वादसति ध्वते अरंतेत्यादौ सिद्धोपाभावः
बाबो· अंतस्थायरलवाः यरलववर्णा अंतस्थसंज्ञाभवंति प्रयोजनं सपरस्वराया संप्रसारणमंतस्थाया इत्यादि इज्यते गृह्यते उप्य
५ ते लकारस्यांतस्थत्वाल्लानइत्यादौ आतोंतस्थासंयुक्तादितिनिष्ठानत्वं ऊष्माणःशषसहाः शषसहावर्णाऊष्मसंज्ञा
5 भवंति वक्ष्यमाणया शिक्षंज्ञया व्यवहारार्हष्मासंज्ञायाःप्रयोजनंनाक्षीत्यपार्थकोयोगः अः इतिविसर्जनीयः अकारा
त्परःकंठ्यऊष्माविसर्जनीयसंज्ञाभवति प्रयोजनंविसर्जनीयश्छेवाशमित्यादि कश्चौरः यश्चन्नः चतुर्णामप्ययोगवाहानां
स्वरूपनिर्देशार्थइतिशब्दः उच्चारणार्थस्तकपाः ꣵकइतिजिह्वामूलीयः ककारात्पूर्वोजिह्वामूलभव ऊष्माजिह्वामूली
यसंज्ञोभवति प्रयोजनं कखयोर्जिह्वामूलीयंनवेत्यादि कःकोपी यःखिन्नः ꣵपइत्युपध्मानीयः पकारात्पूर्वंओष्ठ्यऊष्मा ढु
उपध्मानीयसंज्ञोभवति प्रयोजनं पफयोरुपध्मानीयंनवेत्यादि कःपाति कःपाति कष्फलति अंइत्यनुस्वारः अका राम
रात्परोनासिक्यऊष्मा अनुस्वारसंज्ञोभवति प्रयोजनं मोनुस्वारं व्यंजनइत्यादि त्वंरम्यः पूर्वपरयोरर्थोपलब्धौपदं पूर्व ५
स्यलिंगस्यपरस्यात्याद्देस्तद्यापूर्वस्यधातोःपरस्यचत्यादेर्यःसमुदायएकीभावस्तस्यपदमिति संज्ञाभवति अर्थोपलब्धौसत्या

प्रयोजनं युष्मदस्मदोः पदं पदादित्यादि शिवो वः स्वामी स पातु वः कंसरिपोऽस्मपाणः अर्थोपलब्धिग्रहणं स्यादित्यादिनिघ्यादित
स्यैव प्रकृतिप्रत्ययसमुदायस्य पदसंज्ञार्थं तत्संयोगादेवाहि स्वपरिनिष्ठितः प्रवृत्तिनिवृत्तियोग्योऽर्थ उपलभ्यते तथाहि दर्शइ
ष्यते संख्याकारकाभिधायीत्यादिः वृक्षः वृक्षौ वृक्षाः इत्येकद्विबहुरूपायाः संख्यायाः वृक्षेणकृतं वृक्षं पश्य वृक्षेणजी
वति वृक्षायदेहि वृक्षात्पतितः वृक्षेस्थित इतिकर्तृकर्मकरण संप्रदानापादानाधिकरणानां च स्यादिसंबंधादेव प्रतीतिः
शुचिः शुचीन् शुचिनीत्यादौ क्वचित् लिंगस्यापि स्यादिसन्निकर्षादेवावगतिः तथा संख्याकारककालभावनाम युष्मदस्मदाद्यभि
धायीत्यादिः पचति पचतः पचंति पच्यते पच्येते पच्यंते इत्यादौ कर्तृकर्मणोः कारकयोः तद्गतायाः संख्यायाश्च संख्यायाः
पचति अपाक्षीत् पक्ष्यति इत्यादौ वर्तमानस्य भविष्यद्रूपस्य कालस्य पच्यते तेनेति कर्मतामापन्नस्य भावस्य पचति
पचसि पचामीति नामयुष्मदस्मदां च त्यादिसंयोगादेवावगतिः परोक्षत्वकर्त्रभिप्रेतत्वादिः क्रिया च तत्फलं च गतो विशेषो
पित्यादिसंबंधगम्य एव जघानकंसं किलवासुदेवः यजते यज्वा यजंति याजकाः अनुमतिसमर्थनाशीर्विधिनिमंत्रणामंत्र
णाधीष्ट संप्रश्नः प्रार्थना क्रियातिपत्त्यादयोपित्यादीनामभिधेयावद्धातो संख्याकारकाद्याकांक्षाविकलीकृतार्थाभा

ॐ बाबो ६

साभिधायि प्रत्ययांतरजनि तस्यह समुदायस्य पदसंज्ञा नास्ति यदि स्यात् विद्युता वित्यत्र क्विबंतस्य विद्युच्छब्दस्य पदत्वा द्गोग्र
थमा इति तस्य पदत्वं स्यात् द्युत दीप्तौ विपूर्वः विद्योतते इति क्विप् भ्राजि प्रीधुर्व्यूर्जिग्रावस्तुद्युतिभासां चेति क्विप् तस्य सर्वापहारेण
लोपः तथा दंडिना वित्यत्र ङणना ह्रस्वोपधा इति द्विर्भावं भवेत् दंडो विद्यते ययोरिति तदस्यास्तीति इन् इवर्णावर्णलोपः यद्वे
वमर्थे इत्येव वक्तव्यं मैवं यत्र सर्वपदाभावेपि केवलादेव प्रत्ययात्मकतेर्वार्थ उपलभ्यते तत्रापि पदत्वं यथास्यादित्युपलक्षविग्रह
णमपि कार्यमेव व्यतिसेत्र दधिमेरेहि असभुवि व्यतिपूर्वो कर्मव्यवहारे वर्तमानात्मने पदमध्यमैकवचनं से अदि
अदादेर्लुक् अस्तेरादेरित्यादिलोपः अस्तेः सावितिसलोपः पदत्वादेदोत्परः पदांत इत्यकारलोपः पदत्वात्पदात्परस्य मं ॐ
ह्यामित्यस्य मेआदेशः अनतिक्रमयविश्लेषयेत् मंडूकप्लुत्या स्वरव्यंजनान्यनुवर्तते युक्तानां स्वराणां व्यंजनानां च राम
अतिक्रमं विपर्यासमङ्गं च विश्लेषं ज्ञर्यात् उच्चैर्भवान्यक्ताकि अव्ययसर्वनाम्नइत्यंतात्स्वरात्पूर्वोकच्प्रत्ययः वैयाकरणः ६
व्याकरणं वेत्त्यधीते वा अण् य्वोर्ष्टद्विरिति यकारात्पूर्व ऐकारागमः केचित्तु कोंत्यात्स्वरात्पूर्व लोपदेशात् द्वयोः पदयोर्ह
र्ध्यागमविधानाश्चात्र वर्णा विश्लेषसिद्धिं मन्यमानाः पदमित्यनुवर्त्य सूत्रवाक्यमपोनुवृत्त्यर्थं सांहितिकाविकारजात पदत्व

रूपाश्लिष्टतावहसतिक्रममकार्वंत उत्तरत्रानुवृत्त्यर्थं विधिभ्योऽपहरंति तेषामुत्तरस्य सूत्रमिदं च तंत्रांतरपठितस्य परः सन्निकर्षः
संहिताविरामोवसानमिति सूत्रद्वयस्य प्रातिनिधिवेनाचार्यैः प्रणीतानित्यभिप्रायः व्यंजनमस्वरं वर्णं नयेत्. स्वररहितं व्यंज
नं परं वर्णं नयेत् प्रापयेत् व्यंजनस्वरयोरविरम्योच्चारणार्थं व्यंजनयोश्च संयोगसिद्ध्यर्थं वचनं त्वमत्र सत्कामे सस्वरस्य व्यंजनस्य
तेनैवस्वरेण व्यवधानात्परप्रापणायोगात्परस्य वर्णस्यैव च समभावादस्वरमिति चापार्थकं तत्कृतं विस्पष्टार्थं लोकोपचा
राद्ग्रहणसिद्धिः अर्थवद्ग्रहणेनानर्थकस्य ग्रहणं दूरांतिकयोरंतिकस्य ग्रहणं लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणं नि
रनुबंधकग्रहणेन सानुबंधकस्य ग्रहणं इत्यादीनां ग्रहणानां तदुपलक्षितानामन्यासां च परिभाषाणां लोकोपचाराज्जनव्यवहारा
देवसिद्धिरिति संज्ञांतरमुपदेष्टव्या अपि परिभाषा नोपदिष्टाः नहि मलिनस्य स्नाने बुभुक्षितस्य वा भोजने उपदेश उपयुज्यते
को हि नाम धीमानर्थवंतं त्यक्त्वा निरर्थकं गृह्णीयात् को वांतिकात्सिद्धो दूरं धावेत् कश्च प्रतिपदोक्ते स्वरससिद्धे प्राप्ये लाक्षणिकं
कृतकमाश्रियते कोपि वा केवलेन सिद्धौ सद्वितीयमन्विष्येत् तस्माद्यो लोकतोऽर्थः सिद्धस्तत्र किं यत्नेन एवं सति त्रिष्वत्र व
र्णांकृत्या निरात्रिमात्रा इतरेष्वत्रर्थं त्रियेतदवयवानामनर्थकानां नभवंति इवर्णावर्णलोपः बुद्ध्या नद्या हृदेन उमा

ॐ देवाय उमाया इत्यादौ विह्वरेस्वरेप्रत्यये यकारेच नभवति आमिचक्रः नद्यांवध्वामित्यत्र ज्यामादेशोत्वाद्गिणिकेनभवति त्वांधु
बाबो· वामित्यत्र अमावादेशेआमिरागमोनास्ति द्रूपित्यत्रोसावितिस्वपिसानुबंधकोदिवडौत्वंनास्ति केचित्तुसत्वणाभ्यवहारिणः सार्थ
७ कं निरर्थकं वादधानाः अंतिकादेवकष्टाहरमपिद्यावंतः स्वयंभुविलब्धे कृतकमप्यनुसरंतः केवलेनसिद्धौ सद्वितीयमप्यभि
लषंतः दृश्यंते तद्व्यभिचारोपिपरिभाषाणांभवति तथाहिराज्ञाराज्ञइत्यादिवद्भूरिदाम्ना भूरिदाम्ने इत्यादावनर्थकस्याप्यनोलोपः
दंडीतिवद्वाग्मीइत्यत्रापि इनोदीर्घः विराजाइतिवच्चंद्रमा इत्यस्याप्यसंतस्योपधादीर्घः दामामीमेति वदति कांतामहिमान
मतिमहिमाइत्यत्रापिमनःस्त्रीप्रत्ययाभावः तदुक्तं अनिनःसमग्रहणान्यर्थवताचानर्थकेनतदंतविधिं प्रयोजंतीति तथा अणे
येकादितिविह्वरस्यापिकृतोरणः ईप्रत्ययः वासिष्ठी ऊंभकारी भुवोवोतः इतिलोकिणस्यारच्यादेशस्यापिभुवोवकारागमः बभूव ॐ
अणस्तुवविख्यातीतिख्याप्रथनइत्यस्यैवचाक्षिजादेशस्य सानुबंधकस्यापि ख्यात्रोद्यतन्यामणं आख्यत् इत्थंचसतिसामान्य राम
ग्रहणे ह्यविशेषइत्युपपन्नंभवति उक्तंच लौकिकन्यायमूलत्वादानंत्याद्व्यभिचारतः क्वचिज्ज्ञापकासिद्धत्वात्परिभाषा ७
नसंश्रिताः इतिएवमन्यासामपिपरिभाषाणां लोकतएवसिद्धिर्व्यभिचारावसरौ ॥ इतिजगद्धरविरचितायांबालबोधि

न्यांकातंत्रलघुवृत्तौसंज्ञापादःप्रथमः १ ॥ ॐसमानःसवर्णेदीर्घीभवतिपरश्चलोपं समानोवर्णःसवर्णेपरेदीर्घीभवति परश्च
लोपंप्राप्नोति नृपाज्ञा दधीदं मधूदकं होतृषिः पर्जन्यवल्लक्षणप्रवृत्त्यादीर्घस्यापिपरलोपार्थोदीर्घः महाश्वः समानइतिकिं सुवा
कवगः इहव्यंजनेस्वराणांसंधिनिषेधोवक्ष्यते नव्यंजनानामिति स्थानसावर्ण्यादकारईकारस्य दीर्घोस्यात् संबंधिशब्दत्वाद्दीर्घो
ह्रस्वंस्थानिनमाक्षिपतीति व्यंजनानां प्राप्तिरेवनास्तीतिचेत् नपर्जन्यवल्लक्षणप्रवृत्तेराश्रयणात् अनाश्रितायांहितस्यांदीर्घस्यदीर्घोन
स्यात् ततश्चसन्नियोगशिष्टानामेकतरापायेऽन्यतरापाय इतिपरलोपोपिनस्यात् असवर्णेकार्यांतरविधानाद्व्यंजनेपरे संधिनि
षेधस्यवक्ष्यमाणत्वात्सवर्णएवदीर्घःस्यादितिसवर्णग्रहणमपार्थकमिति नवाच्यं निमित्तसमर्पणार्थत्वात् निमित्तंविनाहिदीर्घःस्यात्
परश्चलोपमित्यनेनैवसमर्पितंनिमित्तमितिचेत् नकोऽरायासिलोपश्चेतिवच्चशब्दस्यापिअन्वाचयवृत्त्यासमानःसर्वत्रदीर्घीभवति
परस्तुयदास्मात्संभवति तदालोपंप्राप्नोतीतिसूत्रार्थोविज्ञायते ह्रस्वस्यतर्ह्यभावःस्यात् नसंधिनिषेधेतुश्रवणात् अँअपेहि इँइंद्रं
पश्य उँउत्तिष्ठ नृपतिःक्षतः एवमुत्तरत्रइवर्णोवर्णादीनामपिनिमित्तसमर्पणार्थत्वंव्याख्येयं शकंध्वादीनां पूर्वलोपएववक्तव्यः श
कअंधुः शकंधुः कर्कअंधुः कर्कंधुः कुलअटा कुलटा कातअंतः कातंतः शुद्धमोदनंयस्यसशुद्धोदनः फलस्यईषा फलीषा

ई एवं लांगलीषा मनसएषा मनीषा मनसः सकारस्य रेफस्तो विसर्जनीयः तस्यापरो लोपश्च इति लोपे कृते ईकारे अकारलोपः सीमंतः
बाबो॰ केशेषु अन्यत्र सीमांत्रः अवर्ण इवर्णे ए परश्च लोपम् इति वर्तते इवर्णो यम् इत्यतः प्राक् अवर्णः अकारजातिः अकारः आकारश्च इवर्णे
८ ईकारे च परे एकारो भवति परलोपश्च तवेदं सेयं महेशः जातिमात्राश्रयणेन व्यक्तितिरोभावाद्यथासंख्याभावः अवर्ण इति किं वागि
४ ह इवर्णे ए इत्यत्र उत्तरत्र च संधिर्न स्यात् तः संदेहो हि स्यात् अवर्ण इत्यत्र इवर्ण इति परसप्तम्या इवर्णस्य परत्वे लब्धे पारिशेष्यात् प्रथमा
तस्यानुपक्रमात् प्रथमांतस्थानिनो लिङ्गिप्रतिभासादसति संदेहे संधिः उवर्णे ओ अवर्ण इति वर्तते इवर्णो यमित्यतः प्राक्
अवर्णः उवर्णे परे ओकारो भवति परलोपश्च तवोदकं सोढा अवर्ण इति किं त्वङ्क्तिः ऋवर्णे अर् अवर्णः ऋवर्णे परे
अर् भवति परलोपश्च तवर्[illegible] सर्द्धिः तवल्कारः ऌकारे अल् विधास्यते अवर्ण इति किं वाष्टता उपसर्गावर्णस्य धात्वृकारे परे आर् ई
वक्तव्यः प्रार्छति प्रार्ध्नोति उपार्ध्नोति यत्क्रियायुक्ताः तं प्रत्युपसर्गा इति प्रगता ऋच्छका अस्मात् प्रर्छको देश इत्यत्र प्रस्य ऋच्छिं राम
प्रति उपसर्गत्वाभावात् आर् न भवति नामधातौ वा ऋषभमिच्छत्यात्मन उपार्षभीयति पूर्वपदावर्णस्य ऋते परे तृतीयासमासे ८
नित्यं सुखार्तः दुःखार्तः तृतीयेति किं परमश्चासौ ऋतः परमर्तः समासे इति किं सुखेनर्तः ऋणप्रवसन वत्सतर कंबल दशा

३ नाम्नेणपरे आरूवक्तव्यः ऋणार्णं प्रार्णं वसनार्णं वत्सतरार्णं कंबलार्णं दशार्णं ऌवर्णेऌ्न्टअल् अवर्णः ऌकारे अल्भवति प
रलोपश्च तवल्कारः खट्वल्कारः एकारेऐकारेच अवर्णः एकारेऐकारेचपरे ऐकारोभवति परलोपश्च पश्यैतत् महैश्वर्यं
अवर्णएवशब्देपरे अनावश्यकेलोपोवक्तव्यः क्वेवस्थास्यति आवश्यकेत्विहैवभावमाघगाः उपसर्गावर्णस्य धात्वेकारेपरे इण्
एधइत्येतयोरेकारंवर्जयित्वा प्रएलयति प्रेलयति इहनभवति प्रैतिप्रैधते प्रस्यएषैष्ययोर्नेष्यते प्रैषः प्रैष्यः प्रेषप्रेष्यौ त्वीषेसंज्ञा
र्थस्य स्वशब्दाकारस्य ईरेरिणोरैत्वं स्वैरं स्वैरी ओकारेऔकारेच अवर्णः ओकारेऔकारेचपरे औकारोभवति परलोप
श्च तवौदनः खट्वौपगवः उपसर्गावर्णस्य धात्वोकारेपरेलोपः प्रोखति ओत्वोष्ठयोःसमासेवा स्थूलोतुः स्थूलौतुः बिंबोष्ठः
बिंबौष्ठः वाक्येनास्ति अत्रोतुः तवौष्ठः प्रस्यऊहऊढऊढिषु औत्वं प्रौहः प्रौढः प्रौढिः अक्षस्यऊहिन्यां अक्षौहिणी पूर्वलो
ऌपे परलोपोनेष्यते अन्यत्रभवत्येव इवर्णोयमसवर्णेनचपरलोपश्च व्यंजनेसंधिनिषेधस्य वक्ष्यमाणत्वादितउत्तरंस्वरे
विधेयः इवर्णोयंप्राप्नोति असवर्णेस्वरेपरे परश्चलोपोनभवति दध्यत्र नद्येषा असवर्णइतिप्राप्तनिमित्तसमर्पणार्थ
मुत्तरत्रच वसुवर्णः उवर्णोवंप्राप्नोति असवर्णेस्वरेपरे नचपरलोपो मध्वत्र वध्वास्या ऋस्त्ववर्णः ऋवर्णःरत्वमाप

ऽ ऋते असवर्णेस्वरेपरे नचपरलोपश्च: पित्रर्थः राकृतिः लृकृवर्णः लृवर्णः लमाप्नोति असवर्णेस्वरेपरे नचपरलोपश्च:
बाबो: लृनुबंधः दीर्घोनास्ति एअय् एकारः अय्भवति नचपरलोपश्च: नयः ऐआय् ऐकारः आय्भवति स्वरेपरे नचपरलो
८ पश्च: नायः ओअव् ओकारः अव्भवति स्वरेपरे नचपरलोपश्च: पवः गोशब्दस्य ओकारस्य अवआदेशः अकारांतः
9 स्वरेवाभवति अवस्फोटायनस्येति तंत्रांतरात् गवेहा गवीहा गवैडका गवेडका इंद्राक्षयोर्नित्यं गवेंद्रः गवाक्षः गो
अग्रं गोग्रं गवाग्रं गोअजिनं गोजिनं गवाजिनं औआव् औकारः आव्भवति स्वरेपरे नचपरलोपश्च: नावः अ
यादीनांयवलोपः पदांतेनवालोपेतुप्रकृतिः अय् आय् अव् आव् एतेअयादयः एषामयादीनां पदांतेस्थितानां
यकारवकारलोपोभवति नवाविकल्पेन लोपेतुप्रकृतिः यथास्वरूपंभवति नसंधिरिताविकृतिः कएते कयेते ऽ
कस्मायिदं कस्माइदं पटइह पटविह असायत्र असावत्र अयादीनामितिकिं नद्यत्र वध्वत्र पदांतइतिकिं शयि राम
तः भावितः एदोत्परः पदांतेलोपमकारः पदांतेयावेदोतौ ताभ्यांपरः अकारःलोपंप्राप्नोति तेत्रसोत्र पदांतइति ८
किं नयनं लवनं पुनःपदांतइतिनित्यत्वार्थं नव्यंजनेस्वराःसंधेयाः व्यंजनेपरेस्वराः संधातव्यानभवंति दंडहस्तः

इधिश्रीतं स्थानसावर्ण्यात्सवर्णेदीर्घःस्यात् श्रीपतिः पशुपतिः नृपतिः अविशेषेणसवर्णेयत्वाद्या उक्ता व्यंजनेपि सुः
पशुपतिरित्यत्रकादयोमावसानाःस्पर्शाः स्पृष्टंकारणंस्पर्शानां विवृतंकरणंस्वराणां ऊष्माणां च नद्यात्स्पृष्टं मंतस्थानामि
ति प्रयत्नभेदादुकारपकारयोरसावर्ण्यं पिच्यमित्यत्ररत्वमिष्यते गोर्यूत्लावध्वपरिमाणे अवादेशः गव्यूतिः क्रोशयु
गं अन्यत्र गोयूतिः इतिश्रीपंडितभट्टश्रीजगद्धरविरचितायांबालबोधिन्यां कातंत्रलघुवृत्तौ स्वरसंधि समानपा
दो द्वितीयः २॥ ॐनमोगुरवे ओदंताअइउआनिपाताःस्वरेप्रकृत्या ओदंताओकारान्तास्तथा अइउआनिपाताःस्व
रेप्रकृत्याभवंति संधिकृतां विकृतिंनापद्यंते नोपतत् अहोआद्यः हंहोअधम अअपेहि इइहाःस्व उउत्तिष्ट आ
एवंतुमन्यसे आ एवंनुकिलतत् निरनुबंधकग्रहणेनसानुबंधकस्यग्रहणमित्याङ्प्रत्यानभवति ईषदस्त्रं आस्त्रं आ
इहि एहि आउदकांतादोदकांतादनुव्रजेत् उदकांतेनविना अर्भकेभ्योयशः आभर्केभ्यः पाणिनेः अर्भकैः सह
पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् पश्चिमांतुसमासीतसम्यगर्क्षविभावनादिति अर्कदर्शनेनविनाऋक्षवि
भावनेनसह ईषदर्थेक्रियायोगेमर्यादाभिविधौचयः एवमातांङितंविद्याद्वाक्यस्मरणयोरङित् विनातेनेतिमर्यादा

उ सहत्येनेत्यभिविधिः अश्रुतंगम्यतेवाक्यमात्राये नाङिदेशः आएवंनुमन्यसे इत्यत्रसर्वनैवसमंस्था इतिवाक्यमकारेण
बाबो· निपाते नगम्यते सहशा दृष्टचिंतायी रङुभूतस्यवस्तुनः यत्तदित्यनुसंधानंस्मरणंतदुदाहृतं येनाविधिरत्तदंतस्यात्वांतग्रह
१० णेलक्षेप्यंतग्रहणमोकारस्यैवांतत्वार्थं तेन अंइउ आंतानिपानप्रकृत्याचेत्यत्रनहूञोवेतिनिपाता इतिकिं पटवि
ह ईजवः उहलेः एशोपिस्वराः प्रकृत्यायथास्यादितिस्वरग्रहणं नोअत्रसर्वस्यप्रकृतिभावाविघातादकारलोपःस्या
त् द्विर्वचनमनौ अनौ ङौकाररहितं द्विर्वचनंप्रकृत्याभवति स्वरेपरे अग्नीअत्र वायूअत्र शालेअत्र पचेते
इह अनाविति किं तावत् अनाविति नञ् तत्पुरुषः तत्रनञिवयुक्तमन्यत्रसदृशे तथाह्यर्थइति ङौकारसदृशस्य
दीर्घांतस्यद्विर्वचनस्यप्रकृतिभावः तथाचोक्तं अभावेस्वल्पाभावेचसादृश्येप्यथविपर्यये ज्ञातायामपिनञ्ज्ञेयोरिष्टा उ
दौचक्षुभोतिषु अब्राह्मणःविपर्यये अभागपं विपर्यये अभागपं अधर्मः ज्ञातायां अपुरुषः एवंसति हृस्वयोरिदं अप राम
वाबह्वादौ इत्यादौनास्तिप्रकृतिः कथमेतदितिचेत् विवस्यसि नञ् तत्पुरुषस्योत्तरपदार्थप्राधान्यादिति इमः १०
निषिध्यमानस्यकथंप्राधान्यं प्राधान्येवासतिकथंतत्सदृशप्रतीतिरितिचेत् वदसि उच्यते इहानियतदेशकाल

वर्तिनी द्रव्यान्तिषु समवेतेमपृथग्भूते आधारे स्थितमेकरूपप्रत्ययोत्पत्तिनिमित्तं सामान्यं जातिः इत्युक्तेः सहजा आगमापायिनो वा
विशेषप्रतीतिहेतवो धर्मा गुणाः अनेककालक्षणविभक्तावयवः फलप्राप्तिपर्यन्तस्थितिः कारकसाध्यो धात्वर्थो भावः तन्निर्वर्तना
त्मकः स्वतन्त्रव्यापारं क्रियातदुक्तं सर्वएवप्रकृत्यर्थो भावः साध्यतयामतः सर्वानिर्वर्तनात्मकर्तृयत्नात्मिका क्रियेति यथा च इंद्रि
यार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षप्रमाणसाध्यत्वात्प्रत्यक्षमुच्यते तथा क्रियासाध्यत्वाद्भावोपि क्रियोच्यते यदुक्तं यथा प्रत्यक्षसा
ध्यत्वाज्ज्ञानं प्रत्यक्षमुच्यते क्रियासाध्यस्तथा भावः क्रियेति व्यपदिश्यते इति तेन भावशब्दा अपि क्रियाशब्द उच्यते पदार्थानां
संव्यवहारसाधनमभिधानं यदृच्छा एते चत्वारः शब्दानामर्था इति पूर्वाचार्या व्याचक्षते यदाहुः चतुष्टयी शब्दानां प्रवृत्तिः जाति
शब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चेति केचित् परस्परं विलक्षणेषु शाबलेयादिपिंडेषु गौर्गौरिति शंखक्षीरबकहारादि
षु अन्योन्यविशिष्टेषु शुक्लः शुक्ल इति नरतुरगकरिवरतरणादिषु पृथग्विधं स्पंदमानेषु चलश्चल इति प्रतिक्षणं भिद्यमाने डित्था
द्यभिधेये डित्थो डित्थ इति एकरूपप्रतिपत्तिहेतुः जातिरेव शब्दस्याभिधेया तथात्वाश्रया विनाभाविन्या व्यक्त्यानयने पात्रानय
नवद्व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति न्यायादिति जातिमेव शब्दार्थं प्रतिजानते

ई अन्ये त्वर्थक्रियामेव प्रयोक्तृप्रतिपत्तॄणां शब्दप्रयोगस्य प्रयोजनं पश्यंतोर्थक्रियाकारित्वं च हानोपादानयोरुपाया व्यक्तेरेव न नीरूपा
बाबो याजातेरितिमन्यमाना व्यक्तिमेव शब्दार्थं प्रगिरंते जातस्तु तस्यामपरिहार्यसन्निधानन्यायेनाव्यभिचारयतोर्थैव शब्दस्तु व्यक्तिपर एवे
११ ति अपरे पुनर्विषयभेदेनोभयमपि शब्दार्थं मन्यंते तथाह्याहुः इह प्रयोजनभावासंभवादुपहतार्थेषु दशदाडिमांगुल्यश्वादिवा
क्याभासेषु वर्तमानाः शब्दा अर्थपरीक्षायामुपेक्ष्या एव विधिनिषेधरूपप्रयोजनपरशास्त्रीयसम्यग्वाक्यवृत्तीनां त्वेषामेवाभिधेय
विचारो युज्यते तत्र वायव्यं श्वेतमजमालभेत इत्यादिषु विधिचोदनासु व्यक्तिविषयत्वमेवाजादिशब्दानामुपपद्यते जातिपरत्वे
हि तेषां यावज्जाति तदाश्रितास्वश्वेताद्यादिव्यक्तिषु आयुरवसानावधिक्रियमाणमालंभादिनियतदेशकालानुष्ठेयांगिभूतक
र्माप्रतिपत्तये स्यात्ततश्च विधिचोदनार्थो लंघितः स्यात् निषेदचोदनासु तु गौर्न पदा स्प्रष्टव्या इत्यादिषु जात्यभिधायत्वमेव गवा ई
दिशब्दानां संगच्छते अनियतदेशकालविषयत्वान्निषेधस्य अन्यथा हि कस्यांचिद्गोव्यक्तावक्रान्तेस्यादान्यस्पर्शे अनुष्ठितेशास्त्रा राम
र्थे कृतार्थत्वे जातेन्यत्र कामचारः स्यात् ततश्च निषेधचोदनार्थोपि लंघित एव स्यादिति प्रतीतिपरमार्थविदस्त्वाहुः शब्दार्थ ११
इति समाप्तिष्ठंते आहुश्च किल परस्पराविनाभावेन जात्यादीनां व्यक्तीनां च वृत्तिरिति तावत्सर्वेषामविप्रतिपत्तिः धर्मधर्मि

भावस्येषामनपह्नवनीयएव तत्रचधर्मविशिष्टेधर्मिणिव्यापृतः शब्दोधर्मेणव्याप्रियते इतिप्रातीतिकमेव धर्मेतुशब्दव्यापार
विषयेधर्मीपरिहृतः स्यादितियद्यपियुक्त्याक्षेपकदर्थनाश्रीयते तथापिप्रतीतिः कथमपह्नूयते गौरितिहिगोजातिमानर्थो
गोशब्दात्प्रतीयते एवंशुक्लइतिशुक्लागुणवान् चलइतिचलनक्रियावान् डित्थइतिडित्थसंज्ञावान् एवंच लोहितोष्णी
षा ऋत्विजः प्रचरंतीतिवाक्यस्यैवक्वापिविशेषणपरत्वेशब्दस्यविधिनिषेधविषयव्यवस्थापियुज्यतएव यदुक्तं विशेष्यंनाभिधा
गच्छेत्क्षीणशक्तिर्विशेषणे इतितदपिप्रतीतिबाह्यमेवसर्वसंवित्साक्षिकायां शब्दाद्विशेषणएवक्षीणशक्तित्वमभिधीयते अ
थोच्यते संकेतसहायः शब्दोर्थं प्रतिपादयति संकेतश्चानंत्याद्व्यभिचाराच्च विशेष्येषुकर्तुंनशक्यते इतिसामान्यएवक्रि
यते तदेवचशब्दव्यापारविषयत्वात्शब्दस्याभिधेयंभवति नतदाश्रयोविशेष्य इत्यतोविशेषणे क्षीणशक्तित्वमभिधायाः
प्रतिज्ञायते इतिएतदपि फल्गुप्रायमेवसंकेतविषयत्वेनहिसामान्यं शब्दाभिधेयतामवलंबमानं स्वाश्रयमाश्रयेज्जह्याद्वाय
द्याश्रयेज्जह्याद्वायद्याश्रयेत्तर्हितदाश्रितः सएवशब्दव्यापारगोचरोभवेत् अथजह्यात्तदानिराश्रयस्यास्यस्थितिरेवनास्ति
अतः शब्दाभिधेयत्वं वस्तुतस्तु शब्दप्रवृत्तौनिमित्तंसामान्यं विशेष्यस्तुतदाश्रयएव यदुक्तं शब्दप्रवृत्तिनिमित्तंजात्यादिर्भावः

उँ गोर्हिस्वरूपेणनगौः नागौः गत्वादिसंबंधात्तुगौरिति अतएवयत्राश्रयात्पृथग्भूताजात्यादयोभिधातुमिष्टास्तत्रतात्वादिभिरभिधीय
बा॰बो॰ मानाउपलभ्यंतेएव गोताशौक्ल्यं चलनं डित्थत्वमिति तदुक्तं यस्यगुणस्यहिभावाद्द्रव्येशब्दनिवेशस्तदभिधाने तात्वौभवतः इति
१२ तथार्थःसिद्धोजातिगुणक्रियाख्यानां समाश्रयः दृष्टत्वदितैर्भावतंत्रैर्जात्यादिस्वपृथक्कृताइतिच तदेवंतद्धतिशब्दार्थेमति नञ्युत
त्तुरुत्तनिषेधस्यधर्ममात्रविषयत्वात्तदाश्रयस्योत्तरपदार्थस्यप्राधान्यात्तद्धर्मविविक्तस्यचतस्यासंभावात्सादृश्यलक्षणान्या
येनतत्सदृशप्रतिपत्तिरितिसिद्धं अतश्चाब्राह्मणमानयेत्यादौब्राह्मणजातौनिषिद्धायांतदाधारःकरचरणादिमान्पिंडः
सन्निकृष्टेनावश्यभावियोगेनक्षत्रियादिजात्यंतरेणयुक्तआनीयते नघटादिः नवाचंडालादिः समासेचप्रधानसंबंधिनावे
वलिंगसंख्येभवतः तेनअस्त्रीचैत्रः अवर्णाः हेमंताः इतिवदर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्रार्थवदित्यस्याधातुरित्य उँ
प्रत्ययइतिचभिन्नलिंगमव्ययीभावादकारांताद्विभक्तीनाममपंचम्याइत्यत्रविभक्तीनामित्यस्याःपंचम्याइतिभिन्नसंख्यंतुल्या राम
र्थैरित्यस्यातुल्योपमाभ्यामन्यतरस्यामित्यत्रतुल्यार्थैरित्यस्यातुल्योपमाभ्यामिति अकारादसंबुद्धौमुश्चेत्यत्रस्यमो १२
रित्यस्यासंबुद्धावितिचभिन्नोभयंचविशेषणंयुज्यतएव एवंतुल्याधिकरणे अस्मरणादिषु जातिकालसुखादिभ्योनाच्छादनात्

ताः अकृतमिति प्रतिपन्नाः अभ्यर्थकृत्तनपुंसकमित्यादावपि बोद्धव्यं अतएवचानेकाः अहौअवह वइत्यादावपि बोद्धव्यं इत्यादावे
कत्वादिसंख्यायां निषिद्धायां तदाश्रयस्यैकाद्विबहुशब्दाधेयस्य प्राधान्यसंबंधी निएकाद्विबहुवचनानि लिंगवत्संख्या अपि शब्द
धर्मत्वात्प्रकृत्यर्थविरोधेपिनदुष्यंति तदुक्तंसंख्यायां निषिद्धायांयोवशिष्टस्तदाश्रयः सप्रधानंयथा जातौ निषिद्धायां तदाश्रय
इति नन्वेवमपिपचावहा आगामित्यत्र प्रकृतिभावः प्राप्नोति ईदंतर्हि ईदूदेद्द्विवचनं प्रगृह्यमिति तत्रांतरे ईकारांतस्य ऊका
रांतस्य एकारांतस्य द्विवचनस्य प्रगृह्यसंज्ञा उक्ता प्रगृह्यमप्लुतप्रगृह्या अचीतितत्रैवप्रकृतिभावो विहितः तेनात्रएकारांतस्य द्वि
वचनस्य प्रकृतिर्नभवति बहुवचनममी अमीइत्येतद्बहुवचनं प्रकृत्याभवति अमीअश्वाः अमीआदित्याः बहुवचनमिति
किं अमोरोगोस्यास्तीति अम्यत्र अनुपस्थितस्य दीर्घैःस्वरितइतिवर्णसमाम्नायेसानुनासिकोक्ताः प्लुतास्तेस्वरेपरेप्रकृत्याभ
वंति वैत्रात्त ३ इह मैत्रात्त ३ आगच्छ तत्रांतरा दूराद्धूतेचेतिप्लुताः संबुद्धावोदंतस्येति शब्देपरे अवैदिके प्रकृतिर्वावक्तव्या भानो
इति भानविति संबुद्धौकिं गवित्ययमाह अत्रोउकारस्यौउकार्येणार्थवत्त्वे सत्यप्यनुकार्यस्वरूप भंगप्रसंगाद्विभक्त्यभावः
इतिशब्देकिं भानविह अवैदिकेकिं पत्नागा अब्रह्मबंधवित्यब्रवीत् समानस्यककारेच देवऋषिः देवर्षिः मालऋश्यः माल

ॐ र्थः याकारौ स्त्रीकृतावितिमालाशब्दस्य ह्रस्वः इति पंडित भट्ट श्री जगद्धर विरचितायां बालबोधिन्यां कातंत्रलघुवृत्तौ स्वरसंधि

श्रीबा· निषेधपातस्तृतीयः २ श्रेयसे ॐ नमो गणेशाय ॥ ॐ वर्गप्रथमाः पदांताः स्वरघोषवत्सु तृतीयान् वर्गाणां ये प्र

बो थमाः कचटतपाः पदांतस्ते स्ववर्गात्प्रत्यासंतेस्तृतीयानापद्यंते स्वरेषु परेषु घोषवत्सु च वागत्र षडेते तदिह त्रिष्टुबियम्त्र

१२ वागगतिः षड्गांति तद्वद्वं त्रिष्टुब्नीता वर्गप्रथमाः किं भवानाह महागतः पदांताः किं वाचो विद्युतो स्वरघोषवत्सु किं वा

कारा वाचमिच्छति वाच्यति वागिवाचरति वाच्यते इत्यादावंतवर्तिनी वाचाकृतं वाचिकं भिनः कोऽइतितं त्रातरे नांतस्यैव विभ

13 क्तिमाश्रित्य पदत्वात्तृतीयः प्राप्तो न भवति यित्याययोः पदसंज्ञानियमात् प्राञ्चं प्राचीनमित्यादौ यचि भमिति भसंज्ञया पदसंज्ञ

याबाधित्वात् पंचमे पंचमांस्तृतीयान्वा वर्गप्रथमा पदांता इत्येव वर्गप्रथमाः पदांताः पंचमे परे स्ववर्गपंचमानापद्यंते तृ ॐ

तीयान्वा वाङ्मंत्रा वाग्मंत्रा षण्मिताः षड्मिताः तन्नीतं तन्नीतं त्रिष्टुम्मिनोति त्रिष्टुब्मिनोति प्रत्ययपंचमे तृतीया नेष्यंते राम

वाङ्मयं तन्मात्रं तन्मादित्वान्मयारण्मात्रौ वर्गप्रथमः किं गीर्मिता पदांतः किं ज्ञातं पंचमे तं वेतिवर्तते गुरुस्त्रकरणं विस्पष्टा १२

र्थं वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं नवा पदांता इत्यर्थवशात्पंचम्यंतं संबध्यते वर्गप्रथमेभ्यः पदांतेभ्यः परः

शकारः स्वरपरो यपरो वपरो रेफपरश्च छकारं प्राप्नोति नवा विकल्पेन वाक्छुद्रा वाक्शुद्रा षट्छ्यामाः षट्श्यामाः तच्छ्रुतं तच्श्रुतं त्रिष्टु
प्छ्रुता त्रिष्टुप्श्रुता वर्गप्रथमेभ्य इति किं प्राङ्शेते पदांतेभ्यः किं अत्तु श्नाति नसः शकारः किं तत्साधु स्वरयवरपरः किं वाक्श्चोतति
लपंचमपरोऽपि वाक्छ्लाघ्या वाक्श्लाघ्या तच्छ्मश्रु तच्श्मश्रु पदांतस्य शकारस्यासंभावात् पदांतग्रहणस्य तद्विशेषणासंभवात् वर्ग
प्रथमादित्यर्थवशात् पंचम्यंतं संबध्यते तिवर्गप्रथमेभ्य इति विस्पष्टार्थं वेति वर्तमाने नवेति च तेभ्य एव हकारः पूर्वचतुर्थं नवा
पदांतग्रहणमुत्तरार्थं वर्तते इह त्वपदांताद्वर्गप्रथमात्परो हकारो नास्ति तेभ्यो वर्गप्रथमेभ्यः परो हकारः पूर्वस्य संबंधिनं चतुर्थमाप्नोति
नवा विकल्पेन वाग्घीनः वाग्हीनः षड्ढूताः षड्हूताः तद्धितं तद्हितं त्रिष्टुब्भुतं त्रिष्टुब्हुतं वर्गप्रथमेभ्यः किं प्राङ्हुतः तेभ्य एवेत्य
पार्थकं उत्तरत्र नित्यत्वार्थं नवेति परस्तु पंचकारो लचटवर्गेषु पदमध्ये तकारात्परेषां लकारचवर्गटवर्गाणामसंभावादिहापि
पदांतग्रहणमुत्तरात्रमेवानुवर्तते तकारः परस्य वर्गस्य रूपमापद्यते लकारे चवर्गे टवर्गे च परे तल्लब्धं तच्चित्रं तच्छत्रं उज्झित
सरिज्झषः तज्जलं महड्ढकः महड्ढकारः उड्डीनः उड्डीकितं उन्मत्तं छठयोरघोषप्रथमः झढयोश्चुटान्तस्तृतीयः डकारः किं वा
च्छरति लचटवर्गेष्विति किं तत्प्राप्य रूपमित्यर्थः पार्थकं वंशे ङकारः शेपरे चमाप्नोति तच्छ्लोतति यत्र पदांशस्य छोना

उ
बा॰बो॰
१४

14

स्ति तदप्युदाहरणं तच्चाग्यं तच्चास्त्युतकारःकिं प्राङ्क्वेति शेकिं तत्सारं ङणनाह्रस्वोपधाःस्वरेद्विः पदांतग्रहणमिहोपयुज्यते
ङणनाः पदांताह्रस्वा उपधायेसां तेतथोक्ताः स्वरेपरेद्विर्भवंति क्रुङ्ङत्र सुगण्णाह पचन्निह ङणनाःकिं त्वमत्र पदांताःकिं
भणतिभणति ह्रस्वोपधाःकिं प्राङास्ते स्वरेइतिकिं सन्नतः नोंतश्छयोःशकारमनुस्वारपूर्वं अंतइतिपदांतस्यार्थं नका
रःपदांतस्यछठयोःपरयोरनुस्वारःपूर्वोयस्मात्तथाविधंशमाप्नोति संश्चौरः यंश्छन्नः नःकिं प्राङ्चरति अंतःकिं यंचति चछयोः
किं सन्करः पदांतग्रहणेनुवर्तमाने पुनरंतरित्युत्तरार्थं तथयोःसकारमित्यत्रानिमित्तसन्निधानात्प्राक्पदांतेस्थितस्य नका
रस्यसकारोयथास्यात् तेनत्वंतरुः त्वंडड्सीत्यादौतथानिमित्तकस्यसकारादेशस्य नकारस्य सकारादेशोनभवति
लाक्षणिकस्यनकारस्यसकारोनस्यादितिचेद्वदसि ननच्छद्यप्रशानिति प्रशान्शब्दस्यनिषेधवचनात् ज्ञायते लाक्ष
णिकस्यापि नकारस्य शत्वादीनिभवंतीतितेनप्रतांश्चौरः प्रतांष्टीकते प्रतांस्तनोति तमुत्थानौ तकारतदनुबंधस्य क्लिशा उ
मित्यर्थः क्विप्चेतिक्विप् तस्यसर्वापहारेणलोपः पंचमोपधेत्युपधादीर्घः मोनोधातोरितिमस्यनः लाक्षणिकत्वा राम
त्तस्यलिंगांतनकारलोपाभावः टतयोःसकारं अनुस्वारपूर्वमितिवर्तते जझञशकारेष्वित्यतःप्राक् नइति १४

डढणपरश्चितियावत् अंतइति त्वापादसमाप्तेः नोंतष्टठयोरनुस्वारपूर्वं षकारमापद्यते संष्टंकः संष्ठक्कारः नः किं प्राडीक
ते अंतःकिं उत्कंठते टठयोः किं सन्नुत्रः तथयोः सकारं नोंतस्तथयोः परयोरनुस्वारपूर्वं सकारमापद्यते महांस्तरुः
महांस्थुडति नः किं प्राङ्करुः अंतःकिं कर्त्तति तथयोः किं महान्करः सपरयोस्तथयोर्नकारस्यानुस्वारपूर्वः सका
रोनेष्यते महास्त्सरुः महांथ्सरुः चयोर्द्वितीयाः शरिपौष्करादेरितिपक्षेतस्यार्थः प्रशान्शब्दस्य शषमानेष्यंते प्रशा
न्चैत्रः प्रशांचीकते प्रशांतरुः लेलं नोंतोल्लेपरे अनुस्वारपूर्वं लमाप्नोति भवांल्लग्नः नः किं प्राङ्लीनः पदम
ध्येनात्परोलकारोनास्ति इत्यंतग्रहणमुत्तरार्थमनुवर्तते लेतिकिं मन्यन्नः जझञशकारेषुञकारं नंतः जकारेझका
रेञकारे शकारेचपरे ञकारमापद्यते सञ्जयः महाञ्झषः महाञ्ञुडुवे महाञ्शेते नः किं प्राङ्नः जादिषु किं स
नघंडः पदमध्येजादिषु नकारस्यानुस्वारवर्गांतयो र्वक्ष्यमाणत्वादुत्तरार्थमेवांतइतिवर्तते एवमुत्तरस्त्रयोरपिज्ञेयं
शिंचंवा नोंतःशकारेपरे ञ्चंवाप्नोति यत्रपक्षेचोनास्ति तत्रपूर्वेण ञकारः महाञ्छूरः महाञ्शूरः वर्गप्रथमेभ्यइति
वाछत्वं महाञ्शूरः डुढणपरस्तुणकारं परः शब्दः प्रत्येकमभिसंबध्यते नोंतःडपरेढपरेणपरश्चणकारमा

ॐ
बाबो॰
१५

15

पद्यते सएडीनः यएदौकते साम्मकारः नः किं प्राङ्हीनः इहलपरः किं सम्राडिः मोनुस्वारं व्यंजने अंगइतीहो
पयुज्यते अन्नत्र च मकारः पदांतः अनुस्वारमाप्नोति व्यंजनेपरे त्वंहमसि व्यंजनमस्वरमिति परेणवर्णेनसंयुज्यते
अग्रोच्चारः साल्लीमः किं सहूंति अंतः किं नमः व्यंजने किं त्वमत्र गम्यते इत्यादौ मनोरनुस्वारो वक्ष्यते समोम
कारस्य राजदीप्तावित्यस्मिन्क्विबंतेपरे मकारएवभवति नानुस्वारः मोराजिसमः क्वाविति तंत्रांतरात् सम्राट् राजदी
प्तौ सत्सुद्विषद्रुहः इहयुजविदभिद छिदनीराजामुपसर्गेपि क्विपिति क्विप् तस्यसर्वापहारेणलोपः सितस्यलोपः इश
षेति जम्पडः वाविरामे इतिटः वर्गेपंतद्वर्गपंचमंवा मकारः पदांतेवर्गसंबंधिन्यक्षरेपरे तस्याक्षरस्य योवर्गस्तत्पंच
मंवाप्नोति पक्षेपूर्वेनानुस्वारः तङ्कथंचातकोएडीननभस्थंपुरुषोवधीत् तंकथंचातकंडीनंनभःस्थंपुरुषोवधीत्
चकारः किं प्राङ्पचति पदांतः किं स्वप्ने रंमात अनुस्वारस्यांतस्थायां परसवर्णोवावक्ष्यते सचानुनासिकेस्थाने सा
नुनासिकइत्युक्तं संय्यंता संयंता सव्वंत्सरः संवत्सरः तल्ँलोकं तंलोकं यय्यंम्यते यंयम्यते वव्वंन्यते वंवन्यते अनु
स्वारस्या किंगम्यते अंतस्थाद्विप्रभेदाः सानुनासिकानिरनुनासिकाश्च रेफोष्मणांसवर्णानसंतीतिशिक्षाविदः त्वंरमसे

ॐ
राम
१५

इतिपंडितभट्टजगद्धरविरचितायांबालबोधिन्यांकातंत्रलघुवृत्तौवर्गपादस्यचतुर्थः ४ ॐविसर्जनीयश्छेवाशं विसर्जनीयःचकारे
छकारेपरेवा शकारंप्राप्नोति कश्छत्रः यश्छत्री वाशब्दोऽयंव्यवस्थितविभाषावाचीति नशिवच्छत्रयोश्छयोर्नेष्यते कःश्छइत्याह हरिशब्द
स्यचंद्रशब्देपरे सकारागमोवक्तव्यः आदिश्चेत्यात् हरिश्चंद्रोराजर्षिः अन्योहरिचंद्रोमानवकः आश्चर्यमित्यनेत्यर्थे अन्यत्र
आश्चर्यं वर्णांतरेषुकार्यांतराणां विधास्यमानत्वात् रिश्चेप्याश्च छयोरेवशःस्यादितिचेत् नव्यवस्थितविभाषयायत्रजिह्वा
मूलीयादयोनभवंति तत्रस्यात् विनैवनिमित्तंशःवास्यात् एवंटेठेइत्यादिज्ञेयं टेठेवाश विसर्जनीयोवर्तते
नविसर्जनीइत्यतःप्राक्त विसर्जनीयोटेठेचपरेवाशमाप्नोति कष्टंकः यष्ठक्कुरः पूर्ववद्व्यवस्थितविभाषात्वादिह नभवति
कःश्नइत्याह गोःपदेसेविते प्रमाणेचार्थेसागमोवक्तव्यः गोभिःसेवितोदेशः गोष्पदः गोचरणप्रमाणेजलोदयः गोष्पदः
अन्यत्रगोपदं वाशब्दःसमुच्चयेवेत्येव हिवर्ततेएवमुत्तरत्रापिज्ञेयं तेथेवासं विसर्जनीयस्तेथेचपरेवा समाप्नोति कस्ततः क
स्थुडति पूर्ववदिहनभवति कःतस्करः तद्बृहतोर्यथासंख्यंकरपत्योःपरयोश्चौरदेवतयोरर्थयोस्तस्य सत्वंवक्तव्यं तस्करश्चौरः
बृहस्पतिर्देवता अन्यत्रतत्करः बृहत्पतिः आस्पदंप्रतिष्ठायांप्रतिष्ठास्थाने अन्यत्र आपदात् आपदं अवस्करोवापुरीषे प

उ॰ द्वे अवकारः मत्कारसत्कारिणौ देयुपरिज्ञास्वरेल्लोपयत्वार्थं घोषवतिलोपार्थं संबुद्धौवावादेरुत्वार्थंच भगोऽत्र भगोयत्र
बाबो॰ अघोयत्र अघोयत्र स्वरेकिं देवाःज्ञांतः एवमेवेतिविस्पष्टार्थं घोषवतिलोपं आभोभ्यामित्येव-आभोभ्यांपरोविसर्जनीयःघो
१६ षवतिपरे लोपंप्राप्नोति देवागताः भोयज्ञ भोवङ्गावाङ्गगोयज अघोगच्छ घोषवतिकिं देवाःस्नांति नामिपरोरं ना
मिनःपरोविसर्जनीयःरेफंप्राप्नोति सर्पीः सुतरः सर्पुर्वाभ्यां पिसिवसिभ्यां परस्याक्विपःसर्वापहारेणलोपः सस्यरेफसो
विसर्जनीयःइरुरोरीदूरौ पुनर्विसर्जनीयः घोषवत्स्वरपरः नियमार्थमिदं नामिनःपरोविसर्जनीयः सतिनिमित्तेघोष
स्व वत्स्वरयोरेवपरयोःरत्वंप्राप्नोति अग्निर्गतः अग्निरत्र श्रीर्जिता श्रीरत्र पटुर्गतःपटुरत्र सर्पीर्भ्यां सुतर्भ्यां इहनास्ति
धीःक्षीणाअद्भिःस्नातं रप्रकृतिरनामिपरोपि रेफस्थानीयोविसर्जनीयः अनामिपरोपिरमाप्नोति घोषवत्स्वरयोरेवपर उ
योः अंतर्गतः अंतरत्र पितर्गच्छ तत्वादीनां बाधः प्रचेतसोराज्ञनिसंबुध्यतेवा रत्वंवक्तव्यं प्रचेताराजन् प्रचेतोराजन् संबु राम
ध्यंतेकिं प्रचेताराजा यस्मिन्नप्रचेतोराजादेशः अहरादीनां पत्यादौ अहर्पतिः अहस्पतिः अर्हपुत्रः अहस्पुत्रः गीर्पतिः १६
गीष्पतिः गीर्पुत्रः गीष्पुत्रः धूर्पतिः धूष्पतिः धूर्पुत्रः धूष्पुत्रः अनामिपरोपिइतिनामिपरस्य रेफक्वते रघोषवत्स्वरपरस्या

पि विसर्जनीयस्य माभूदित्येवमर्थं एभिःस्यातं अमीभिःस्तं तस्माद्भिर्भिसः अदसश्चेतिभिर् एवं गीःस्यात गीःक्षणेत्यादौ ज्ञेयं एष
सपरलोपेव्यंजने एषसशब्दाभ्यांपरोविसर्जनीयः व्यंजनेपरेलोपनीयः एषचरति सदाता अकप्रत्ययेसमासेनचलोपः तन्मध्यपतित
स्य तद्ग्रहणेनग्रहणात्तदंतविधिनामप्राप्तिः एषकोददाति सकोददाति अनेषघ्नौरः असःकयेतिनिरर्थकयोरेषसयोर्नास्ति मेघोज
कयोः मेतिनिषेधंकरोति येनसमस्करोवेणुः निपातनान्माशब्दस्यह्रस्वः सकारागमश्च मस्करोस्यास्तीति मस्करीयतिः सहिवंध
ककर्मप्रवृत्तानां माकृतकर्माणि शांतिर्वःश्रेयसीतिबंधकेषुकर्मसुप्रवृत्तिंनिषेधयति एवमन्यदपितत्रांतरदनुसरणीयं कख
योर्जिह्वामूलीयंनवा विसर्जनीयःकखयोःपरयोर्जिह्वामूलीयमापद्यते नवाविकल्पेन कःकरोति कःखनति इहापिव्यव
स्थितविभाषया कःक्षीण इत्यादौनास्ति वेतिवर्तमाने नवेत्यपार्थकं ऽनत्रच पफयोरुपध्मानीयंनवा विसर्जनीयःप
फयोःपरयोरुपध्मानीयमापद्यते नवाविकल्पेन कःपाति कःफलति प्राप्तम् अद्भिःप्सातमित्यत्रनास्ति शेषेसेवावापरस्वरूपं
विसर्जनीयः शकारेसकारेसकारेचपरे परस्पसंबंधिनरूपमापद्यते कःशेते कष्षष्टः कस्साधुः एकोवाशब्दःसमुच्चयेहितीः
यो विकल्पेसचाग्रे नित्यत्वार्थः वेत्येवहिवर्तते प्राग्वद्व्यवस्थयाअघोषेषुपरेषु शषसेषुनास्तिकःश्चोतति कःष्ठीवति कःस्तौति

उ
सा॰बो॰
१७

उमकारयोर्मध्ये हयोरकारयोर्मध्येयोविसर्जनीयस्सउत्वं प्राप्नोति कोत्रसोर्थः अंतःपदसंधेरंतरंगत्वबलत्वादोत्वमेव नवाहिःप
दाश्रयंबत्वं अघोषवतोश्च अकारघोषवतोर्मध्ये योविसर्जनीयः सउत्वंप्राप्नोति कोगतः योधावति अपरलोप्योन्यस्वरेयंवा
अकारात्परोविसर्जनीयः लोपनीयोभवति यत्वंचापद्यते अन्यस्मिन्नकारादौस्वरेपरे कआह कयाह कइह कयिह अकारेत
त्वस्योक्तत्वादन्यइति विस्पष्टार्थं आभोभ्यामेवमेवस्वरे अकाराद्भोशब्दाच्च परोविसर्जनीयएवमेवलोपयत्वेएवापद्यते स
र्वस्मिन्स्वरेपरे देवाआहुः देवयाहुः भोइह भोयिह स्वरइत्यनत्वनिवृत्त्यर्थं भगोअघोभोवदितिवक्तव्यं गतःदासःपचति
सशब्दसहचरितस्यैषशब्दस्यसर्वनाम्नोग्रहणादेषोवदति इत्यादौनभवति इगगतोव्यंजनांताच्चेतिवक्तव्य. उपधायुणः इच्छार्थ
स्यैषेः इच्छाति निपात्यते नविसर्जनीयलोपेपुनःसंधिः विसर्जनीयस्यलोपेकृते पुनःसंधिर्नभवति तथाचैवोदाहृत
लोपेइतिपरमसमीतेन विसर्जनीयलोपेपरेपूर्वस्यसंधिर्नभवति परस्यतुभवत्येव एषच्छात्रः यद्येवंभोअत्रेत्यत्रपरस्या
कारस्य एदोत्परस्यपदांतइतिलोपप्राप्नोति पुनर्ग्रहणात्रभविष्यति पादपूरणेक्वचित्संधिरिष्यते सैषदाशरथीरामः
सैषराजायुधिष्ठिरः सैषदुर्योधनोराजासैषपार्थोधनुर्धरः रोरेलोपंस्वरश्चपूर्वोदीर्घ रेफोरेफेपरे लोपंप्राप्नोति पूर्वश्च

उ
राम
१७

स्वरो दीर्घः संपद्यते वीरौति पद्दरमः स्वाराज्यं स्वरस्यैव संभवात्स्वर इति विस्पष्टार्थं द्विर्भावं स्वरपरश्छकारः स्वरात्परश्छकारः द्वि
र्भावं प्राप्नोति इच्छति तरुच्छाया दीर्घात्पदांताद्वेष्यते देवीच्छाया देवीछाया पदांतादिति किं ह्रीछति स्वरपरः किं वाक्छलं
रहवर्जितस्य व्यंजनस्य व्यंजने द्विर्भावो वेष्यते चक्रं चक्रं रहवर्जितस्येति किं दर्पः प्रह्वः रेफहकाराभ्यां परस्य स्वरेपि गर्गः गर्ग्गः
अर्क्कः अर्कः ब्रह्म्मा ब्रह्मा धर्म्मः धर्मः जैह्म्यं जैह्म्यं रेफहकाराभ्यामिति किं इंद्रः रहवर्जितस्येत्येव अर्हतं अर्हः
अर्ह्यं इतिश्रीपंडितभट्ट जगद्धरविरचितायां बालबोधिन्यां विसर्जनीय संधिपादः पंचमः ५ ॐ नमो गुरवे ॥
ॐ चवाहाहैवनोइहोताहौ हे अथोनिपाताव्ययं निपाताव्ययमिति प्रत्येकं संबध्यते चवाहा अह एव नो हंहो उताहो हो अ
हो अथो एषामेकादशानां शब्दानामेकैको निपातसंज्ञो भवति अव्ययसंज्ञश्च प्रयोजनमोदंता अइउ आनिपाता अव्यया इत्या
दि निपतति परनिर्दिष्टेष्वर्थेषु निपातः नास्तिव्ययोस्येत्यव्ययमिति संज्ञयोरर्थानुसंधानादन्येपि इव विना नाना पृथक् हिरुक
ताजक् धिक् दधक् अतेहे हैरे अरे हरे अये हये अयि अंग कच्चित् अक्रायकं शश्वत् तूष्णीं जोषं एवं ओं अइउ आ
आः अथउ उक्ताविति इति इत् सहसमं साकं सार्धं सत्रा मंक्षुः स्वस्ति अलं नमः स्वाहा स्वधा वषट् वौषट् श्रौषट् दिवा दो

उ
बाबो
२८

प्रासायं नक्तं अह्नाह्नं चिरं चिराय लघु क्षिप्रं द्रुतं शीघ्रं वारं ध्रुवं अतिवेलं भृशं अतिमात्रं नितांतं सततं अजस्रं
अनारतं अनिशं नित्यं द्रुक्षं आशु ईषत् ननु तत्र ऊ हि वै वा वत खलु किल बत हंत प्रायः माङ् मास्म नञ् उच्च
सुष्ठु दुष्ठु यावता यावत् तावता तावत् दिव स्वित् यदि चेत् नेत् नहि नकिं माकिं संप्रति मास्म किमु किंउ यत्.
उत अहह इत्यादयः परतंत्रार्थाभिधायित्वा न्निपातास्तेऽव्ययसंज्ञाः इति इहलचादि योगेच ओदंता अइउआ निपा
ता इति प्रयोजनदृष्ट्यापेक्षया एकदेशैवलक्षिताः पुनर्निपातार्थवाचित्वाच्च सत्ववाचिनामव्ययत्वंनास्ति अस्थानेयच्चेः प
ठितः हिर्यस्मादर्थे इतियदिस्यात् अव्ययाश्चेतिसिल्लोपोभवेत् एषांकेचित्संबध्यमाना त्वर्थादेव प्रयुज्यमानाः
स्वार्थाभिधानेऽसमर्थेन खलुधवश्चखदिर इतिप्रयुक्ते धौवाखदिरयोः समासयोग्यगम्यते नचवा व्रीहिभिर्यवैरितिवि
कल्पः वास्तृतीयासप्तम्योरित्यादौ प्राक्प्रयोगापिवाशब्दो दृश्यते इति चेत् न पूर्वस्त्रादृश्यवर्तमानस्य अन्यादेशस्याप
अन्वासंबध्यमानत्वात् नचाप्यग्निरिवेतिवद्दिवाग्निरित्यत्रोपमागम्यत एवं स्ववैवावर्त्तु इत्यादावाप्यस्याप्रयोगोलक्ष्या
ताचेष्याः विवक्षावशात्क्वचिद्विशेषणादिशेष्याहापश्चात्प्रयुज्यंते [illegible] अङ्गुलं चैदवं योगसमासे

उ
सार
२८